# Rishigautamaprokta Mahadevarchana Mahima

# ઋષિગૌતમપ્રોક્તા મહાદેવાર્ચનમહિમા

## Document Information

Text title : Rishigautamaprokta Mahadevarchana Mahima

File name : mahAdevArchanamahimARRiShigautamaproktA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 36| 17-49 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# ઋષિગૌતમપ્રોક્તા મહાદેવાર્ચનમહિમા

શિવલિઙ્ગાર્ચનધ્યાનશસ્ત્રેણાતિશિતેન તુ ।
સંસારપાશવિચ્છેદો ભવતીત્યવગમ્યતામ્ ॥ ૧॥

સંસારસાગરે તાવત્ ભયં ભવતિ સર્વથા ।
યાવન્નારાધિતો દેવો મહાદેવો ભવઃ પ્રભુઃ ॥ ૨॥

યસ્તુ દેવો મહાદેવઃ સર્વદેવશિખામણિઃ ।
તન્નામસ્મરણોદ્યોગેઽપ્યઘરાશિલયો ભવેત્ ॥ ૩॥

શ્રીમહાદેવનામાનિ સ્મર્તવ્યાનીતિ યસ્ય ધીઃ ।
તસ્ય પાપાચલાદ્ભીતિઃ કદાપિ ન ભવિષ્યતિ ॥ ૪॥

મહાદેવાર્ચને બુદ્ધિઃ તાવન્નૈવોપજાયતે ।
યાવન્નાઘકુલધ્વાન્તવિલયઃ શઙ્કરઃ સ્મૃતઃ ॥ ૫॥

શઙ્કરસ્મરણાકારપ્રભાકરકરાદૃતે ।
ચિત્તપાપાન્ધકારસ્ય વિલયો ન ભવેત ધ્રુવમ્ ॥ ૬॥

શ્રીમહાદેવભક્તાનાં ભવબન્ધભયં કુતઃ ।
ભવસ્મરણમાત્રેણ ભવરાશિર્વિનશ્યતિ ॥ ૭॥

ભવગાઢાન્ધકારોઽપિ મહામોહપ્રદઃ સદા ।
તદ્ભક્તિભાનુમાલોક્ય સ્વત એવ વિનશ્યતિ ॥ ૮॥

દિવાભીતનિભં યત્તુ ભયં સંસારલક્ષણમ્ ।
તન્મહેશાર્ચનાકારસૂરે દૃષ્ટે વિનશ્યતિ ॥ ૯॥

મહાદેવપ્રસાદસ્તુ સહસા જાયતેઽપિ ન ।
તજ્જ્ઞાને સતિ સંસારભયમેવ ન જાયતે ॥ ૧૦॥

મહાદેવં સકૃદ્વાઽપિ યઃ સ્મરેત્ ભસ્મભૂષણઃ ।
તત્પાદદર્શનેનાપિ ન સંસારમહાભયમ્ ॥ ૧૧॥

મહાદેવાર્ચને ભક્તિઃ સહસા નોપજાયતે ।
સા ચેજ્જાતા તતો દુઃખં કાલાદપિ ન જાયતે ॥ ૧૨॥

મહાદેવાભિધાનાનિ સુધાધારાનિભાનિ યઃ ।
શ◌ृણોતિ તત્કુલસ્યાપિ ન સંસારભયં ભવેત્ ॥ ૧૩॥

મહાદેવાભિધાનેન શ્રુતેનાપિ સ્મૃતેન વા ।
સંસારસાગરાપારતરિણાऽપિ તરન્તિ તે ॥ ૧૪॥

મહાદેવં સકૃત્ ધ્યાત્વા સ્મૃત્વા તન્નામ સાદરમ્ ।
સમ્ભારનાગરં તીર્ત્વા પ્રયાન્તિ શિવમ દરમ્ ॥ ૧૫॥

ભાગ્યવન્તો મહાદેવનામરૂપાં સુધાં મુહુઃ ।
સ્મૃત્વા કર્ણપુટૈઃ પીત્વા સ્તન્યાનિ પિબન્તિ હિ ॥ ૧૬॥

ભક્ત્યા કર્ણસુવર્ણપાત્રગમહાદેવાભિધાનામૃતં
પીત્વા તિષ્ઠ ગરિષ્ઠનિષ્ઠુરવચોચીચીપ્રપઞ્ચૈરલમ્ ।
તેનૈવાશુ વરિષ્ઠતાં વ્રજ પુનઃ સંસારઘોરાર્ણવં
વ્યાકીર્ણામિવ કર્ણધારવરતાં પ્રાપ્ય ત્વયા સત્વરમ્ ॥ ૧૭॥

મહાદેવાભિધાનેન નિધાનેન પરં ધની ।
તદ્ધનં સાવધાનેન સાધુભિર્ધ્યાયતે હૃદિ ॥ ૧૮॥

મહાદેવાભિધાનસ્ય ધ્વનિમધ્વનિ સાધવઃ ।
સુધાધુનીમિવ પ્રાપ્ય સાનન્દં પ્રાપ્નુવન્તિ હિ ॥ ૧૯॥

મહાદેવાભિધાનેન મહાનન્દસમૃદ્ધયઃ ।
વૃદ્ધિં પ્રયાન્તિ તાસાં તુ પરમાનન્દસન્નિભાઃ ॥ ૨૦॥

મહાદેવં મુહુર્ધ્યાત્વા સકૃદ્વા પુણ્યકોટિભિઃ ।
પુણ્યરાશિમનુપ્રાપ્ય પુણ્યવાનેવ જાયતે ॥ ૨૧॥

પાપઘોરાબ્ધિમગ્નાનાં ક્ષણાત્ તરણકારણમ્ ।
મહાદેવભિધાનં હિ મહાપત્તારકં પરમ્ ॥ ૨૨॥

મહાદેવાભિધારૂપમમૃતં શિવનિર્મિતમ્ ।
સંસારોસ્મરાપારવિષયશિવિનાશકમ્ ॥ ૨૩॥

સંસારસાગરે ઘોરે મગ્નો ભગ્નમનોરથઃ ।
અનાથનાથં ન કથં વિશ્વનાથમહં ભજે ॥ ૨૪॥

ઇદં દૃષ્ટં શિવસ્થાને પાપનાશાય જાયતે ।
પાપઘોરાબ્ધિમમગ્નાનાં ક્ષણાત્ તરણકારણમ્ ॥ ૨૫॥

ઇતોઽપ્યત્યુત્તમં લિઙ્ગં લિઙ્ગં તીર્થેશ્વરાભિધમ્ ।
ઇતોઽપ્યત્યુત્તમં લિઙ્ગં મણ્ડલેઽસ્મિન્ ન દૃશ્યતે ॥ ૨૬॥

તત્રાદ્ય ગત્વા તીર્થેશઃ પૂજનીયઃ પ્રયત્નતઃ ।
સોમત્રયોદશી સેયં પાતાર્દ્રાસંયુતા તથા ॥ ૨૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તા મહાદેવાર્ચનમહિમા સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૩૬। ૧૭-૪૯ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 36. 17-49 ..

Proofread by Ruma Dewan

*Rishigautamaprokta Mahadevarchana Mahima*
pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*